**RAMAKRISHNA MISSION VIDYAMANDIRA**
**(Residential Autonomous College affiliated to University of Calcutta)**
**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, AUGUST 2021**
**SECOND YEAR [BATCH 2019-22]**
**SANSKRIT (HONOURS)**
**Paper : VIII [CC8]**

Date : 07/08/2021
Time : 11.00 am - 1.00 pm
Full Marks : 50

1. कश्चि**देकः** प्रश्नः समाधेयः। [1×10]

क) अर्थशास्त्रानुसारं वर्णधर्माणाम् आश्रमधर्माणां सर्ववर्णाश्रमसाधारणधर्माणां च परिचयः प्रदेयः।(4+4+2)

ख) अर्थशास्त्रानुसारं दूतः परराज्यस्य नृपतेः पुरस्तात् कथंकारं स्वामिवचनं समुपस्थापयेत् ? अविसृष्टः दूतः कथंकारं तिष्ठेत् परराष्ट्रे ? कार्यस्य सिद्धावप्युप-रुध्यमानो दूतः किं किं चिन्तयेत्?(3+3+4)

2. विषयमेकमवलम्ब्य टी**कैका** विरचनीया। [1×3]

क) मन्त्रभेदः।

ख) अरिषड्वर्गः।

3. **एकस्या**नुच्छेदस्य वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। [1×3]

क) ... अन्यैरमात्यगुणैरयुक्ता ह्येते । पितृपैतामहानमात्यान् कुर्वीत, दृष्टाप-दानत्वात् । ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात् । अमानुषेष्वपि चैतद् दृश्यते – गावो ह्यसगन्धं गोगणमतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते ...।

ख) ... वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत् स्वप्नं लौल्यमनृतमुद्धतवेषत्वमनर्थ-संयोगं च, अधर्मसंयुक्तमनर्थसंयुक्तं च व्यवहारम्। धर्मार्थाविरोधेन कामं सेवेत, न निःसुखः स्यात्। समं वा त्रिवर्गमन्योन्यानुबन्धम्।

4. कश्चि**देकः** प्रश्नः समाधेयः। [1×10]

क) कामजव्यसनेषु कानि क्रमेणात्यधिककष्टकराणि ? कस्माद्धेतोः ? क्रोधजव्यसनेषु च कानि क्रमेणाधिककष्टकराणि ? कस्माद्धेतोः ? व्यसनमरणयोर्मध्ये किं तावत् कस्माद्धेतोरधिककष्टकरम् ? (1+4+1+3+1)

ख) नृपः किं किं पर्यालोच्य वणिजः करान् दापयेत् ? भूस्वामिना राष्ट्रादाब्दिकः करः कथंकारं ग्रहीतव्यः ? पशुमांसयोः कृते का करव्यवस्था ? नृपतिः कस्माद्धेतोः श्रोत्रियात् करं न गृह्णीयात् ? आत्मोपजीविभ्यः केन प्रकारेण करं स्वीकुर्याद्राजा ? 'उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीडयेत्' इत्यस्य तात्पर्यं किम् ? (2+1+1+2+1+3)

5. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्**। [1×7]

क) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्॥

ख) अपि यत् सुकरं कर्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किमु राज्यं महोदयम् ॥

6. यथेच्छम् <u>**एकः**</u> प्रश्नः समाधेयः। [1×10]

क) को नाम व्यवहारः**?** तस्य कति पादाः**,** के च ते **?** समासेन तेषाम् आलोचनं कुरुत।

ख) याज्ञवल्क्यमतानुसारम् ऋणादाननीतयः सम्यक् सविशदमालोचनीयाः।

7. यथेच्छम् <u>**एकः**</u> श्लोको व्याख्येयः। [1×7]

क) स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्।।

ख) निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम्।
मिथ्याभियोगी द्विगुणमभियोगाद्धनं हरेत्।।

———— × ————